श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.29 - ષષ્ઠ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(વ્ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.
નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્

એકાદશઃ સ્કન્ધઃ

.. અથૈકોનત્રિંશોઽધ્યાયઃ ..

ઉદ્ધવ ઉવાચ

સુદુશ્ચરામિમાં(મ્) મન્યે, યોગચર્યામનાત્મનઃ .
યથાં(ઞ્)જસા પુમાન્ સિદ્ધ્યેત્, તન્મે બ્રૂહ્યં(ઞ્)જસાચ્યુત .. ૧..

પ્રાયશઃ(ફ્) પુણ્ડરીકાક્ષ, યું(ઞ્)જન્તો યોગિનો મનઃ .
વિષીદન્ત્યસમાધાનાન્- મનોનિગ્રહકર્શિતાઃ .. ૨..

અથાત આનન્દદુઘં(મ્) પદામ્બુજં(મ્)
હં(મ્)સાઃ(શ્) શ્રયેરન્નરવિન્દલોચન .

સુખં(ન્) નુ વિશ્વેશ્વર યોગકર્મભિસ્-
ત્વન્માયયામી વિહતા ન માનિનઃ .. ૩..

કિં(ગ્) ચિત્રમચ્યુત તવૈતદશેષબન્ધો,
દાસેષ્વનન્યશરણેષુ યદાત્મસાત્ત્વમ્ .
યોઽરોચયત્ સહ મૃગૈઃ(સ્) સ્વયમીશ્વરાણાં(મ્)
શ્રીમત્કિરીટતટપીડિતપાદપીઠઃ .. ૪..

તં(ન્) ત્વાખિલાત્મદયિતેશ્વરમાશ્રિતાનાં(મ્),
સર્વાર્થદં(મ્) સ્વકૃતવિદ્ વિસૃજેત કો નુ .
કો વા ભજેત્ કિમપિ વિસ્મૃતયેઽનુ ભૂત્યૈ,
કિં(વ્ઁ) વા ભવેન્ન તવ પાદરજોજુષાં(ન્) નઃ .. ૫..

નૈવોપયન્ત્યપચિતિ(ઙ્) કવયસ્તવેશ,
બ્રહ્માયુષાપિ કૃતમૃદ્ધમુદઃ(સ્) સ્મરન્તઃ .
યોઽન્તર્બહિસ્તનુભૃતામશુભં(વ્ઁ) વિધુન્વન્-
નાચાર્યચૈત્યવપુષા સ્વગતિ(વ્ઁ) વ્યનક્તિ .. ૬..

શ્રીશુક ઉવાચ

ઇત્યુદ્ધવેનાત્યનુરક્તચેતસા,
પૃષ્ટો જગત્ક્રીડનકઃ(સ્) સ્વશક્તિભિઃ .
ગૃહીતમૂર્તિત્રય ઈશ્વરેશ્વરો,
જગાદ સપ્રેમમનોહરસ્મિતઃ .. ૭..

શ્રીભગવાનુવાચ

હન્ત તે કથયિષ્યામિ, મમ ધર્માનસુમંઙ્(ઙ્)ગલાન્ .
યાઞ્છ્રદ્ધયાઽઽચરન્ મર્ત્યો, મૃત્યું(ઞ્) જયતિ દુર્જયમ્ .. ૮..

કુર્યાત્ સર્વાણિ કર્માણિ, મદર્થં(મ્) શનકૈઃ(સ્) સ્મરન્ .
મય્યર્પિતમનશ્ચિત્તો, મદ્ધર્માત્મમનોરતિઃ .. ૯..

દેશાન્ પુણ્યાનાશ્રયેત, મદ્ભક્તૈઃ(સ્) સાધુભિઃ(શ્) શ્રિતાન્ .
દેવાસુરમનુષ્યેષુ, મદ્ભક્તાચરિતાનિ ચ .. ૧૦..

પૃથક્ સત્રેણ વા મહ્યં(મ્), પર્વયાત્રામહોત્સવાન્ .
કારયેદ્ ગીતનૃત્યાદ્યૈર્- મહારાજવિભૂતિભિઃ .. ૧૧..

મામેવ સર્વભૂતેષુ, બહિરન્તરપાવૃતમ્ .
ઈક્ષેતાત્મનિ ચાત્માનં(યઁ), યથા ખમમલાશયઃ .. ૧૨..

ઇતિ સર્વાણિ ભૂતાનિ, મદ્ભાવેન મહાદ્યુતે .
સભાજયન્ મન્યમાનો, જ્ઞાનં(ઙ્) કેવલમાશ્રિતઃ .. ૧૩..

બ્રાહ્મણે પુલ્કસે સ્તેને, બ્રહ્મણ્યેઽર્કે સ્ફુલિં(ઙ્)ગકે .
અક્રૂરે ક્રૂરકે ચૈવ, સમદૃક્ પણ્ડિતો મતઃ .. ૧૪..

નરેષ્વભીક્ષ્ણં(મ્) મદ્ભાવં(મ્), પું(મ્)સો ભાવયતોઽચિરાત્ .
સ્પર્ધાસૂયાતિરસ્કારાઃ(સ્), સાહં(ઙ્)કારા વિયન્તિ હિ .. ૧૫..

વિસૃજ્ય સ્મયમાનાન્ સ્વાન્, દૃશં(વ્ઁ) વ્રીડાં(ઞ્) ચ દૈહિકીમ્ .
પ્રણમેદ્ દણ્ડવદ્ ભૂમા-વાશ્વચાણ્ડાલગોખરમ્ .. ૧૬..

યાવત્ સર્વેષુ ભૂતેષુ, મદ્ભાવો નોપજાયતે .
તાવદેવમુપાસીત, વાઙ્મનઃ(ખ્)કાયવૃત્તિભિઃ .. ૧૭..

સર્વં(મ્) બ્રહ્માત્મકં(ન્) તસ્ય, વિદ્યયાઽઽત્મમનીષયા .
પરિપશ્યન્નુપરમેત્, સર્વતો મુક્તસં(મ્)શયઃ .. ૧૮..

અયં(મ્) હિ સર્વકલ્પાનાં(મ્), સધ્રીચીનો મતો મમ .
મદ્ભાવઃ(સ્) સર્વભૂતેષુ, મનોવાક્કાયવૃત્તિભિઃ .. ૧૯..

ન હ્યં(ઙ્)ગોપક્રમે ધ્વં(મ્)સો, મદ્ધર્મસ્યોદ્ધવાણ્વપિ .
મયા વ્યવસિતઃ(સ્) સમ્યઙ્ - નિર્ગુણત્વાદનાશિષઃ .. ૨૦..

યો યો મયિ પરે ધર્મઃ(ખ્) કલ્પ્યતે નિષ્ફલાય ચેત્ .
તદાયાસો નિરર્થઃ(સ્) સ્યાદ્, ભયાદેરિવ સત્તમ .. ૨૧..

એષા બુદ્ધિમતાં(મ્) બુદ્ધિર્- મનીષા ચ મનીષિણામ્ .
યત્ સત્યમનૃતેનેહ, મર્ત્યેનાપ્નોતિ મામૃતમ્ .. ૨૨..

એષ તેઽભિહિતઃ(ખ્) કૃત્સ્નો, બ્રહ્મવાદસ્ય સઙ્ગ્રહઃ .
સમાસવ્યાસવિધિના, દેવાનામપિ દુર્ગમઃ .. ૨૩..

અભીક્ષ્ણશસ્તે ગદિતં(ઞ્), જ્ઞાનં(વ્ઁ) વિસ્પષ્ટયુક્તિમત્ .
એતદ્ વિજ્ઞાય મુચ્યેત, પુરુષો નષ્ટ સં(મ્)શયઃ .. ૨૪..

સુવિવિક્તં(ન્) તવ પ્રશ્નં(મ્), મયૈતદપિ ધારયેત્ .
સનાતનં(મ્) બ્રહ્મગુહ્યં(મ્), પરં(મ્) બ્રહ્માધિગચ્છતિ .. ૨૫..

ય એતન્મમ ભક્તેષુ, સમ્પ્રદદ્યાત્ સુપુષ્કલમ્ .
તસ્યાહં(મ્) બ્રહ્મદાયસ્ય, દદામ્યાત્માનમાત્મના .. ૨૬..

ય એતત્ સમધીયીત, પવિત્રં(મ્) પરમં(મ્) શુચિ .
સ પૂયેતાહરહર્માં(ઞ્), જ્ઞાનદીપેન દર્શયન્ .. ૨૭..

ય એતચ્છ્રદ્ધયા નિત્યમવ્યગ્રઃ(શ્) શૃણુયાન્નરઃ .
મયિ ભક્તિં(મ્) પરાં(ઙ્) કુર્વન્, કર્મભિર્ન સ બધ્યતે .. ૨૮..

અપ્યુદ્ધવ ત્વયા બ્રહ્મ, સખે સમવધારિતમ્ .
અપિ તે વિગતો મોહઃ(શ્), શોકશ્ચાસૌ મનોભવઃ .. ૨૯..

નૈતત્ત્વયા દામ્ભિકાય, નાસ્તિકાય શઠાય ચ .
અશુશ્રૂષોરભક્તાય, દુર્વિનીતાય દીયતામ્ .. ૩૦..

એતૈર્દોષૈર્વિહીનાય, બ્રહ્મણ્યાય પ્રિયાય ચ .
સાધવે શુચયે બ્રૂયાદ્, ભક્તિઃ(સ્) સ્યાચ્છૂદ્રયોષિતામ્ .. ૩૧..

નૈતદ્ વિજ્ઞાય જિજ્ઞાસોર્- જ્ઞાતવ્યમવશિષ્યતે .
પીત્વા પીયૂષમમૃતં(મ્), પાતવ્યં(ન્) નાવશિષ્યતે .. ૩૨..

જ્ઞાને કર્મણિ યોગે ચ, વાર્તાયાં(ન્) દણ્ડધારણે .
યાવાનર્થો નૃણાં(ન્) તાત, તાવાં(મ્)સ્તેઽહં(ગ્) ચતુર્વિધઃ .. ૩૩..

મર્ત્યો યદા ત્યક્તસમસ્તકર્મા,
નિવેદિતાત્મા વિચિકીર્ષિતો મે .
તદામૃતત્વં(મ્) પ્રતિપદ્યમાનો,
મયાઽઽત્મભૂયાય ચ કલ્પતે વૈ .. ૩૪..

શ્રીશુક ઉવાચ
સ એવમાદર્શિતયોગમાર્ગસ્-
તદોત્તમશ્લોકવચો નિશમ્ય .
બદ્ધાં(ગ્)જલિઃ(ફ્) પ્રીત્યુપરુદ્ધકણ્ઠો,
ન કિં(ગ્)ચિદૂચેઽશ્રુપરિપ્લુતાક્ષઃ .. ૩૫..

વિષ્ટભ્ય ચિત્તં(મ્) પ્રણયાવઘૂર્ણં(ન્),
ધૈર્યેણ રાજન્ બહુ મન્યમાનઃ .
કૃતાં(ગ્)જલિઃ(ફ્) પ્રાહ યદુપ્રવીરં(મ્),
શીર્ષ્ણા સ્પૃશં(મ્)સ્તચ્ચરણારવિન્દમ્ .. ૩૬..

ઉદ્ધવ ઉવાચ
વિદ્રાવિતો મોહમહાન્ધકારો,
ય આશ્રિતો મે તવ સન્નિધાનાત્ .

વિભાવસોઃ(ખ્) કિં(ન્) નુ સમીપગસ્ય,
શીતં(ન્) તમો ભીઃ(ફ્) પ્રભવન્ત્યજાદ્ય .. ૩૭..

પ્રત્યર્પિતો મે ભવતાનુકમ્પિના,
ભૃત્યાય વિજ્ઞાનમયઃ(ફ્) પ્રદીપઃ .
હિત્વા કૃતજ્ઞસ્તવ પાદમૂલં(ઙ્)
કોઽન્યત્ સમીયાચ્છરણં(ન્) ત્વદીયમ્ .. ૩૮..

વૃક્ણશ્ચ મે સુદૃઢઃ(સ્) સ્નેહપાશો,
દાશાર્હવૃષ્ણ્યન્ધકસાત્વતેષુ .
પ્રસારિતઃ(સ્) સૃષ્ટિવિવૃદ્ધયે ત્વયા,
સ્વમાયયા હ્યાત્મસુબોધહેતિના .. ૩૯..

નમોઽસ્તુ તે મહાયોગિન્, પ્રપન્નમનુશાધિ મામ્ .
યથા ત્વચ્ચરણામ્ભોજે, રતિઃ(સ્) સ્યાદનપાયિની .. ૪૦..

શ્રીભગવાનુવાચ
ગચ્છોદ્ધવ મયાઽઽદિષ્ટો, બદર્યાખ્યં(મ્) મમાશ્રમમ્ .
તત્ર મત્પાદતીર્થોદે, સ્નાનોપસ્પર્શનૈઃ(શ્) શુચિઃ .. ૪૧..

ઈક્ષયાલકનન્દાયા, વિધૂતાશેષકલ્મષઃ .
વસાનો વલ્કલાન્યં(ઙ્)ગ, વન્યભુક્ સુખનિઃ(સ્)સ્પૃહઃ .. ૪૨..

તિતિક્ષુર્દ્વન્દ્વમાત્રાણાં(મ્) સુશીલઃ(સ્) સં(યઁ)યતેન્દ્રિયઃ .
શાન્તઃ(સ્) સમાહિતધિયા, જ્ઞાનવિજ્ઞાનસં(યુઁ)યુતઃ .. ૪૩..

મત્તોઽનુશિક્ષિતં(યઁ) યત્તે, વિવિક્તમનુભાવયન્ .
મય્યાવેશિતવાક્ચિત્તો, મદ્ધર્મનિરતો ભવ .
અતિવ્રજ્ય ગતીસ્તિસ્રો, મામેષ્યસિ તતઃ(ફ્) પરમ્ .. ૪૪..

શ્રીશુક ઉવાચ
સ એવમુક્તો હરિમેધસોદ્ધવઃ(ફ્),
પ્રદક્ષિણં(ન્) તં(મ્) પરિસૃત્ય પાદયોઃ .
શિરો નિધાયાશ્રુકલાભિરાર્દ્રધીર્-
ન્યષિં(ઞ્)ચદ્દ્વન્દ્વપરોઽપ્યપક્રમે .. ૪૫..

સુદુસ્ત્યજસ્નેહવિયોગકાતરો,
ન શક્નુવં(મ્)સ્તં(મ્) પરિહાતુમાતુરઃ .
કૃચ્છ્રં(યઁ) યયૌ મૂર્ધનિ ભર્તૃપાદુકે,
બિભ્રન્નમસ્કૃત્ય યયૌ પુનઃ(ફ્) પુનઃ .. ૪૬..

તતસ્તમન્તર્હૃદિ સં(ન્)નિવેશ્ય,
ગતો મહાભાગવતો વિશાલામ્ .
યથોપદિષ્ટાં(ઞ્) જગદેકબન્ધુના,
તપઃ(સ્) સમાસ્થાય હરેરગાદ્ ગતિમ્ .. ૪૭..

ય એતદાનન્દસમુદ્રસમ્ભૃતં(ઞ્),
જ્ઞાનામૃતં(મ્) ભાગવતાય ભાષિતમ્ .
કૃષ્ણેન યોગેશ્વરસેવિતાઙ્ઘ્રિણા,
સચ્છ્રદ્ધયાઽઽસેવ્ય જગદ્ વિમુચ્યતે .. ૪૮..

ભવભયમપહન્તું(ગ્) જ્ઞાનવિજ્ઞાનસારં(ન્),

નિગમકૃદુપજહ્રે ભૃં(ઙ્)ગવદ્ વેદસારમ્ .

અમૃતમુદધિતશ્ચાપાયયદ્ ભૃત્યવર્તાન્,

પુરુષમૃષભમાદ્યં(ઙ્) કૃષ્ણસં(ગ્)જ્ઞં(ન્) નતોઽસ્મિ .. ૪૯..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)

સં(મ્)હિતાયામેકાદશસ્કન્ધે એકોનત્રિં(મ્)શોઽધ્યાયઃ .. ૨૯..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

